# श्री पाण्डुरंग विठ्ठल शतकम्

कवयिता : पण्ढरीनाथाचार्यः गलगली

तुष्टिर्यस्य हि भक्तितस्तुलसिका पत्रैः पदेस्वेऽर्पितैः
तृप्तिः किं च सतालवादननुति ध्यानेन गानेन च ।।
सुप्रीतिः पितृमातृसेवनवशाध्यस्याधिका स्यादपि
तं भक्त्यैककवश्य विठ्ठलविभुं दृश्यं भजे योगिनाम् ।। (१)

कर्तुं सर्वजनोपकारमखिलं हर्तुं च पापं नृणाम्
संसारार्णवमग्नभुग्नजनमुद्धर्तुं विततुं श्रियम् ।।
सर्वानन्ददमोक्षमन्दिरमपि त्यक्त्वा च मुक्त्वा सतीं
क्षोणीमेत्य च पण्ढरापुरमितो देवः सदैव श्रियै ।। (२)

कट्यां ते निहितं मुधा मम शिदःपुट्यां करं निक्षिप
लोष्ठे निष्ठितपद्द्वयं च तव मद्वक्षःस्थले स्थापय ।।
चक्षुः किंच निमीलिते मयि विभो किञ्चित्त्वमुन्मीलय
तेनोद्धारमयामि यामि मुद*मायामी र्न यामीःशुचः (३)

बौद्धास्त्वां ननु शुद्धबुद्ध भगवन् बुद्धं हि मुग्धा विदुः
जैनास्त्वामजिनं जिनं विवृजिनं जानन्ति नूनं जनाः ।।
शैवा स्त्वां शिवलिंगिनं तव कपालकङार शङखं परं
तत्तेकं न हि कोऽपि पश्यति हरे दिग्वस्त्रतामोहिताः ।। (४)

---

*आयामीः विस्तृताः, यामीः यमसंबन्धिनीः शुचः
दुःखानि न यामि न प्राप्नोमि मुदं यामि संतोषं उपयामि ।।

इष्टः प्राग्यमिनां सुरैरपि नरैरिष्टोऽमितेष्टिव्रजै-
रिष्टीनां विरहाद्वितुष्ट हृदयोऽप्यैकां तु खण्डेष्टिकाम् ।।
कृत्वा विष्टरमिष्टिनाममुदितश्चाधिष्ठितः पण्ढरी-
क्षेत्रे शिष्टजनैरभिष्टुतनतः श्रीविठ्ठलः श्रेयसे ।।

मन्दं ते हसितं गतेर्विलसितं मन्दं च सन्दानतो
मन्दारायसि मन्दरोऽपि विधृतो मन्दाकिनी ते सुता ।।
मन्दोऽहं सुत एव ते किमु ममोद्धारे नु मन्दायसे
पुत्रस्योद्धरणे भवेत्किमु पिता मन्दाक्षमन्दः क्वचित् ।।

पुत्राणां पितृसेवनं हि परमो धर्मश्च कर्मोत्तमं
तेनाहं मुदितो भवामि विदितो शास्त्रोदितोऽयं क्रमः ।।
एतत्ख्यापयितुं च पण्ढरपुरे यः पुण्डलीकं पितृ-
सेवाजीविनमावृणोत्स्वयममुं श्रीपांडुरंगं भजे ।।

कान्तासुतादि बहुचिन्ताशतैर्मनुज किं ताम्यसीह नु वृथा
भ्रान्तांग घोरभवकान्तारवर्त्मनि नितान्तातुरः सुखकृते ।।
त्वं तात संस्मर हरिं तापनाशनमनंताख्यविठ्ठलमिळा-
सन्तानवृक्ष-यदुसंतानरत्न-भवसन्तारकाच्युत-विभुम्

महाराष्ट्रभूषामणी भक्तयोषा सखूपेष्यपिष्टं स्वयं पेषयन्तम् ।।
निजान्पोषयन्तं शुचं शोषयन्तं सदा तोषये तं परं पाण्डुरंगम् ।।
चलच्चन्द्रभागालसत्तीरभागे स्फुरच्चन्द्रभासोल्लसन्मन्दहासः ।।
स्फुटल्लोष्ठनिष्ठ स्तडित्कान्तिजुष्टः स्फुटब्रह्मलिंगो मुदे पाण्डुरंगः ।।

दृष्टिर्भक्तजनेषु यस्य च दयावृष्टिर्हि कष्टापहा
मुष्टिः कांचनकांचिकांचितकटौ यष्टिस्तथोर्वन्तरे ।।
इष्टिः पादतले लसत्तुलसिकापत्रेण तुष्टिर्हृद-
श्चेष्टे को ननु विठ्ठलं हि समभिष्टोतुं समष्ट्यात्मना ।।

Scanned by CamScanner